॥ वाल्मीकि रामायण॥

७ उत्तरकाण्ड

अध्याय ४३

विसृज्य तु सुहृद्वर्गं बुद्धया निश्चित्य राघवः ।
समीपे द्वाःस्थमासीनमिदं वचनमब्रवीत् ॥ १॥

शीघ्रमानय सौमित्रिं लक्ष्मणं शुभलक्षणम् ।
भरतं च महाबाहुं शत्रुघ्नं चापराजितम् ॥ २॥

रामस्य भाषितं श्रुत्वा द्वाःस्थो मूर्ध्नि कृताञ्जलिः ।
लक्ष्मणस्य गृहं गत्व प्रविवेशानिवारितः ॥ ३॥

उवाच च तदा वाक्यं वर्धयित्वा कृताञ्जलिः ।
द्रष्टुमिच्छसि राजा त्वां गम्यतां तत्र माचिरम् ॥ ४॥

बाढमित्येव सौमित्रिः श्रुत्वा राघव शासनम् ।
प्राद्रवद्रथमारुह्य राघवस्य निवेशनम् ॥ ५॥

प्रयान्तं लक्ष्मणं दृष्टवा द्वाःस्थो भरतमन्तिकात् ।
उवाच प्राञ्जलिर्वाक्यं राजा त्वां द्रष्टुमिच्छति ॥ ६॥

भरतस्तु वचः श्रुत्वा द्वाःस्थाद्रामसमीरितम् ।
उत्पपातासनात्तूर्णं पङ्क्तयाम् एव ततोऽगमत् ॥ ७॥

दृष्टवा प्रयान्तं भरतं त्वरमाणः कृताञ्जलिः ।
शत्रुघ्नभवनं गत्वा ततो वाक्यं जगाद ह ॥ ८॥

एह्यागच्छ रघुश्रेष्ठ राजा त्वां द्रष्टुमिच्छति ।
गतो हि लक्ष्मणः पूर्वं भरतश्च महायशाः ॥ ९॥

श्रुत्वा तु वचनं तस्य शत्रुघ्नो रामशासनम् ।
शिरसा वन्द्य धरणीं प्रययौ यत्र राघवः ॥ १०॥

कुमारानागताञ्श्रुत्वा चिन्ताव्याकुलितेन्द्रियः ।
अवाक्षिरा दीनमना द्वाःस्थं वचनमब्रवीत् ॥ ११॥

प्रवेशय कुमारांस्त्वं मत्समीपं त्वरान्वितः ।
एतेषु जीवितं मह्यमेते प्राणा बहिश्चराः ॥ १२॥

आज्ञप्तास्तु नरेन्द्रेण कुमाराः शुक्लवाससः ।
प्रह्वाः प्राञ्जलयो भूत्वा विविशुस्ते समाहिताः ॥ १३॥

ते तु दृष्टवा मुखं तस्य सग्रहं शशिनं यथा ।
सन्ध्यागतमिवादित्यं प्रभया परिवर्जितम् ॥ १४॥

बाष्पपूर्णे च नयने दृष्टव रामस्य धीमतः ।
हतशोभां यथा पद्मं मुखं वीक्ष्य च तस्य ते ॥ १५॥

ततोऽभिवाद्य त्वरिताः पादौ रामस्य मूर्धभिः ।
तस्थुः समाहिताः सर्वे रामश्चाश्रूण्यवर्तयत् ॥ १६॥

तान्परिष्वज्य बाहुभ्यामुत्थाप्य च महाभुजः ।
आसनेष्वाध्वमित्युक्त्वा ततो वाक्यं जगाद ह ॥ १७॥

भवन्तो मम सर्वस्वं भवन्तो मम जीवितम् ।
भवद्भिश्च कृतं राज्यं पालयामि नरेश्वराः ॥ १८॥

भवन्तः कृतशास्त्रार्था बुद्धौ च परिनिष्ठिताः ।
सम्भूय च मदर्थोऽयमन्वेष्टव्यो नरेश्वराः ॥ १९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com